JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# ARKA (CALOTROPIS PROCERA) IN DIFFERENT PERIODS OF SAMHITA KALA IN AYURVEDA

**Dr. Parmider[1], Dr. Satya Deo Panday[2]**

1. Ph.D. Scholar, Faculty of Ayurveda (Dravyaguna), Desh Bhagat University Mandi Gobindgarh
2. Guide & Professor, Faculty of Ayurveda, Desh Bhagat University Mandi Gobindgarh.

**Corresponding Author -** Dr. Parmider**,** Ph.D. Scholar, Faculty of Ayurveda (Dravyaguna), Desh Bhagat University Mandi Gobindgarh.

## ABSTRACT

**Arka** (Calotropis *procera*) is a wonderful drug of its kind, which have specific action on different systems of body. Beauty of this plant is its availability in abundance. It is very easy to collect and to use it. It has marvellous results on many parts of the body. Arka is described in different periods of Ayurveda for different significance. It is one of the oldest drugs found in Ayurveda as references of this drug is found from as late as Vedic period. The primary focus of Ayurveda is herbal treatment. Medical plants are seen as potential new sources for creating antibiotic-alternative medicines. Calotropis procera is a plant that is commonly cultivated and has antibacterial qualities against a variety of bacteria as well as being used for other things. Being a purgative, antihelminthic, anticoagulant, anticancer, anti-inflammatory, antipyretic, analgesic, and antibacterial, it is employed in traditional medicine to treat conditions including leprosy, leucoderma, ulcers, tumours, piles, and ailments of the spleen, liver, and abdomen. Calotropis procera has been shown to exhibit antibacterial properties against a variety of bacteria, including Enterobacter cloacae, Escherichia coli, Staphylococcus aureus, Streptococcus faecalis, etc. through several in vivo and in vitro experiments. Uscharin, calotoxin, calactin, calotropin, calotropagenin, and uscharin are its active ingredients. It is known as krimighna (antihelminthic), kandughna (reduces itching), vranashodhan (wound healing), jantughna (antimicrobial), kushthaghna (cure leprosy), shothhar (reduces edoema), and vednasthapan in Ayurvedic literature (analgesic). So, the purpose of this study is to detail all medical qualities and current developments in Calotropis procera.

**KEYWORDS -Arka,** Calotropis procera, different Samhita kala, Vedic period, etc.

## INTRODUCTION

Ayurveda is the knowledge of life and longevity being started from Adi-dev Brahma. Ayurveda is the oldest and best effective science of humanity. This system of medicine is bound to have a powerful imprint in the field of medicine of this coming century, which offer safe and proven remedies as an alternative to the allopathic medicine which has limitations. Ayurveda is best open system i.e. built into the oldest layer of culture, which evident as it reflects the language of the Vedas, the oldest literature of mankind and is rooted in the entire culture and life of common people of country.[1]

Ayurveda has a lot of gems in its pocket. Many of wonderful drugs are its pride, which have specific action on different systems of body. Arka (Calotropis *procera*) is one of them. Beauty of this plant is its availability in abundance. It is very easy to collect and to use it. It has marvellous results on many parts of the body. The name "Calotropis" stems from Greek with the meaning of "Beautiful boat keel".[2] Historically, *Calotropis* has been of economic interest as many parts of the plant are usable. It is a sacred plant to many Hindis, associated with the observances of the maruts (winds), demigods of the Rigvedic God Rudra.[3] In the Arabian world, *Calotropis* was associated with sun-worship in ancient times, and also in Vedic times, the leaves of *Calotropis*, in form of arkapatra (sun-leaf) or arkaparna (lightning leaf), have been associated with sun-worship. Arka is described in different periods of Ayurveda for different significance.[4] It is one of the oldest drugs found in Ayurveda as references of this drug is found from as late as Vedic period.

## METHODOLOGY –

The material of Arka collected from authentic different Samhita's, Grantha, Teeka's, Nighantu's etc.

## VEDIC PERIOD

The reference of Arka in Vedic period is described in BRAHMANA GRANTHAS. In BRAHMANA GRANTHAS it is equated to Agni and Anna. In SHATPADA BRAHMANA equation is made between Arka human parts.[5]

**ETYMOLOGICALLY ARKA TERM MEANS** – to be worshiped. Krishna yajurvediyas believe that Arka is born – when saint angirasa's sweat drops have fallen on a goat while the saint was traveling for heavens. The greedy goat touched some leaves which turned to be Arka.[6]

**TABLE 1 REFERENCES OF ARKA IN VEDIC PERIOD**

| Book | Mentioning | References |
|---|---|---|
| Yajurveda | Origin of Arka from saint angirasa's sweat drops | Krishna yajurvediyas |
| Brahmana grantha | Equated to agni,anna and human parts | Shatapatha Brahmana |
| Yaskacharya | Arka refers to Mantra (hyme), Deva (god) , Anna | ya.5/8 |

| | | |
|---|---|---|
| | (food) and a plant (vanaspati) | |

### REFERENCES OF ARKA IN YASKACHARYA

अर्कोदेवोभवति | यदेन्मरचन्ति | अर्कोमन्त्रोभवति | यदनेनार्चन्ति | अर्कमन्त्रंभवति |

अर्चन्तिभूतानि | अर्कोवृक्षोभवति संवृत: कटुकिम्ना || (या 5/8)

**SAMHITA KALA: -** This period is golden period in classification of drugs and even many new drugs are included in classification system. Reference of Arka is included in every Samhita in different yogas in different diseases.[7] References of Arka in different Samhita are described below.

### REFERENCES OF ARKA IN CHARKA SAMHITA

**Table 2 References of Arka in sutra sthanam**

| YOG | Reference |
|---|---|
| Trayo Vriksha | ch.su.1/114,115 |
| Manashiladi pradeham | ch.su.3/12 |
| Bhedhaniya mahakṣhayam | ch.su.4/9 |
| Svedopaga mahakshayam | ch.su.4/13 |
| Naḍi sveda dravyaṇi | ch.su.14/31 |
| Prastara sveda dravyaṇi | ch.su.14/42 |
| Naḍi sveda vidhi | ch.su.14/43 |

अथापरे त्रयो वृक्षाः पृथग्ये फलमूलिभिः| स्नुह्यर्काश्मन्तकास्तेषामिदं कर्म पृथक् पृथक्||११४||

वमनेऽश्मन्तकं विद्यात् स्नुहीक्षीरं विरेचने| क्षीरमर्कस्य विज्ञेयं वमने सविरेचने||११५

च.सू. 1/114-115

मनःशिलाले मरिचानि तैलमार्कं पयः कुष्ठहरः प्रदेहः| तुत्थं विडङ्गं मरिचानि कुष्ठं लोध्रं च तद्वत् समनःशिलं स्यात्||१२||च. सू .3/12

सुवहार्कोरुबुकाग्निमुखीचित्राचित्रकचिरबिल्वशङ्खिनीशकुलादनीस्वर्णक्षीरिण्य इति दशेमानि भेदनीयानि भवन्ति |

च.सू .4/9

शोभाञ्जनकैरण्डार्कवृश्चीरपुनर्नवायवतिलकुलत्थमाषबदराणीति दशेमानि स्वेदोपगानि भवन्ति

च.सू .4/13

वारुणामृतकैरण्डशिग्रुमूलकसर्षपैः| वासावंशकरञ्जार्कपत्रैरश्मन्तकस्य च||३१||

शोभाञ्जनकसैरेयमालतीसुरसार्जकैः |पत्रैरुत्क्वाथ्य सलिलं नाडीस्वेदं प्रयोजयेत्||३२||

च. सू .14/31-32

शूकशमीधान्यपुलाकानां वेशवारपायसकृशरोत्कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरप्रच्छदेपञ्चाङ्गुलोरुबूकार्कपत्रप्रच्छदे वास्वभ्यक्तसर्वगात्रस्य शयानस्योपस्वेदनं प्रस्तरस्वेद इति विद्यात्॥४२॥ च.सू.14/42

स्वेदनद्रव्याणां पुनर्मूलफलपत्रशुङ्गादीनां मृगशकुनपिशितशिरस्पदादीनामुष्णस्वभावानां वा यथार्हमम्ललवणस्नेहोपसंहितानांमूत्रक्षीरादीनां वा कुम्भ्यां बाष्पमनुद्वमन्त्यामुत्क्वथितानां नाड्या शरेषीकावंशदलकरञ्जार्कपत्रान्यतमकृतया गजाग्रहस्तसंस्थानयाव्यामदीर्घया व्यामार्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाहस्रोतसा सर्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विनामितयावातहरसिद्धस्नेहाभ्यक्तगात्रो बाष्पमुपहरेत्; बाष्पो ह्यनृजुगामी विहतचण्डवेगस्त्वचमविदहन् सुखं स्वेदयतीति नाडीस्वेदः॥४३। च.सू.14/43

**TABLE 3 REFERENCE OF ARKA IN VIMANA STHANAM**

| YOG | Reference |
|---|---|
| Kriminashak puplika | ch.vi.7/21 |
| Vamankaraka dravyaṇi | ch.vi.8/135 |
| Tikta Skandha | ch.vi.8/143 |
| Shirovirechana dravyhṇi | ch.vi.8/151 |

अनेन कल्पेन मार्कवार्कसहचरनीपनिर्गुण्डीसुमुखसुरसकुठेरकगण्डीरकालमालकपर्णासक्षवकफणिज्कबकुलकुटजसुवर्णक्षीरीस्वरसानामन्यतमस्मिन् कारयेत् पूपलिकाः; तथाकिणिहीकिराततिक्तकसुवहामलकहरीतकीबिभीतकस्वरसेषु कारयेत् पूपलिकाः; स्वरसांश्चैतेषामेकैकशो द्वन्द्वशः सर्वशो वामधुविलुलितान् प्रातरनन्नाय पातुं प्रयच्छेत्। च.वि.7/21

यानि तु खलु वमनादिषु भेषजद्रव्याण्युपयोगं गच्छन्ति तान्यनुव्याख्यास्यामः।तद्यथा- फलजीमूतकेक्ष्वाकुधामार्गवकुटजकृतवेधनफलानि, फलजीमूतकेक्ष्वाकुधामार्गवपत्रपुष्पाणिआरग्वधवृक्षकमदनस्वादुकण्टकपाठापाटलाशार्ङ्गेष्टामूर्वासप्तपर्णनक्तमालपिचुमर्दपटोलसुषवीगुडूचीचित्रकसोमवल्कशतावरीद्वीपीशिग्रुमूलकषायैः,मधुकमधूककोविदारकर्वुदारनीपविदुलबिम्बीशणपुष्पीसदापुष्पाप्रत्यक्पुष्पाकषायैश्च,एलाहरेणुप्रियङ्गुपृथ्वीकाकुस्तुम्बुरुतगरनलदह्रीवेरतालीशोशीरकषायैश्च ,इक्षुकाण्डेक्ष्विक्षुवालिकादर्भपोटगलकालङ्कृ(ङ्क)तकषायैश्च,सुमनासौमनस्यायनीहरिद्रादारुहरिद्रावृश्चीरनर्नवामहासहाक्षुद्रसहाकषायैश्च,शाल्मलिशाल्मलिकभद्रपर्ण्येलापर्ण्युपोदिकोद्दालकधन्वनराजादनोपचित्रागोपीशृङ्गाटिकाकषायैश्च,पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरसर्षपफाणितक्षीरक्षारलवणोदकैश्च, यथालाभं यथेष्टं वाऽप्युपसंस्कृत्यवर्तिक्रियाचूर्णावलेहस्नेहकषायमांसरसयवागूयूषकाम्बलिकक्षीरोपधेयान्मोदकानन्यांश्च भक्ष्यप्रकारान् विविधाननुविधाय यथार्हंवमनार्हाय दद्याद्विधिवद्वमनम्। इति कल्पसङ्ग्रहो वमनद्रव्याणाम्।कल्पमेषां विस्तारेणोत्तरकालमुपदेक्ष्यामः॥१३५॥ च.वि 8/135

चन्दननलदकृतमालनक्तमालनिम्बतुम्बुरुकुटजहरिद्रादारुहरिद्रामुस्तमूर्वाकिराततिक्तककटुकरोहिणीत्रायमाणाकारवेल्लिकाकरीरकरवीरकेबुककठिल्लकवृषमण्डूकपर्णीकर्कोटकवार्ताकुकर्कशकाकमाचीकाकोदुम्बरिकासुषव्यतिविषापटोलकुलकपाठागुडूचीवेत्राग्रवेतसविकङ्कतबकुलसोमवल्कसप्तपर्णसुमनार्कावल्गुजवचातगरागुरुवालकोशीराणीति , एषामेवंविधानां चान्येषां तिक्तवर्गपरिसङ्ख्यातानामौषधद्रव्याणां छेद्यानि खण्डशश्छेदयित्वा भेद्यानि चाणुशो भेदयित्वा प्रक्षाल्यपानीयेनाभ्यासिच्य साधयित्वोपसंस्कृत्य यथावन्मधुतैललवणोपहितं सुखोष्णं बस्तिं श्लेष्मविकारिणे विधिज्ञो विधिवद्द्यात्, शीतं तुमधुसर्पिर्भ्यामपसंसृज्य पित्तविकारिणे विधिज्ञो विधिवद्द्यात्।इति तिक्तस्कन्धः॥१४३ च. वि 8/143

शिरोविरेचनद्रव्याणि पुनरपामार्गपिप्पलीमरिचविडङ्गशिग्रुशिरीषतुम्बुरुपिल्वजाज्यमोदावार्ताकीपृथ्वीकैलाहरेणुकाफलानि च,सुमुखसुरसकुठेरकगण्डीरकालमालकपर्णासक्षवकफणिज्झकहरिद्राशृङ्गवेरमूलकलशुनतर्करीसर्षपपत्राणि च, अर्कालर्ककुष्ठनागदन्तीवचापामार्गश्वेताज्योतिष्मतीगवाक्षीगण्डीरपुष्प्यवाक्पुष्पीवृश्चिकालीवयस्थातिविषामूलानि च,हरिद्राशृङ्गवेरमूलकलशुनकन्दाश्च, लोध्रमदनसप्तपर्णनिम्बार्कपुष्पाणि च, देवदार्वगुरुसरलशल्लकीजिङ्गिन्यसनहिङ्गुनिर्यासाश्च,तेजोवतीवराङ्गेङ्गुदीशोभाञ्जनकबृहतीकण्टकारिकात्वचश्चेति|

शिरोविरेचनं सप्तविधं, फल-पत्र-मूल-कन्द-पुष्प निर्यासत्वगाश्रयभेदात्|

लवणकटुतिक्तकषायाणिचेन्द्रियोपशयानि तथाऽपराण्यनुक्तान्यपि द्रव्याणि यथायोगविहितानि शिरोविरेचनार्थमुपदिश्यन्त इति||१५१|| च.वि. 8/151

**TABLE 4 REFERENCE OF ARKA IN CHIKITSA STHANAM**

| YOG | Reference |
|---|---|
| Agurvadi tailam | ch.ci.3/267 |
| Chitraka lepam | ch.ci.7/85 |
| Kushadi tailam | ch.ci.7/102 |
| Shavetkarvirpallavadi tailam | ch.ci.7/16-107 |
| Kanaka ksheeri tailam | ch.ci.7/112 |
| Palankashadi tailam | ch.ci.10/34 |
| Vataja shotha anulepanam | ch.ci.12/67 |
| Shotha unmardanam | ch.ci.12/72 |
| Devdaarvadi lepam | ch.ci.13/108 |
| Arsha Parisechana, avgahana dravyani | ch.ci.14/44-45 |
| Arsha abhyanga dravyani | ch.ci.14/49 |
| Arsha nashaka pralepam | ch.ci.14/53-57 |
| Kshara gutika | ch.ci.15/183 |
| Mustakadi churana | ch.ci.17/125 |
| Dantyadi lepam | ch.ci.21/126 |
| Mritsanjeevano agada | ch.ci.23/56 |
| Vrishchika visha agada | ch.ci.23/209 |
| Grihagodha visha agada | ch.ci.23/216 |
| Amrit ghritam | ch.ci.23/244 |
| Nyagrodadi vrana ropana kashayam | ch.ci.25/87 |
| vraaa prachchadanam | ch.ci.25/95 |
| Krimighnadi varti | ch.ci.26/13 |
| Phalamooladi lavanam | ch.ci.26/24 |
| Urustambha pathyaharam | ch.ci.27/27 |
| Ashvagandhadi utsadanam | ch.ci.27/50 |
| Vatsakadi lepam | ch.ci.27/54 |

| | |
|---|---|
| Sarlapadi lepam | ch.ci.29/148 |
| Arkadi varti | ch.ci.30/71 |
| Kariradi kvatha | ch.ci.30/82 |
| Karnini yoni chikitsa | ch.ci.30/109 |

अथोष्णाभिप्रायिणां ज्वरितानामभ्यङ्गादीनुपक्रमानुपदेक्ष्यामःअगुरुकुष्ठतगरपत्रनलदशैलेयध्यामकहरेणुकास्थौणेयकक्षेमकैलावराङ्गदलपुरतमालपत्रभूतीकरोहिषसरलशल्लकीदेवदार्वग्निमन्थबिल्वस्योनाककाश्मर्यपाटलापुनर्नवावृश्चीरकण्टकारीबृहतीशालपर्णीपृश्निपर्णीमाषपर्णीमुद्गपर्णीगोक्षुरकैरण्डशोभाञ्जनकवरुणार्कचिरबिल्वतिल्वकशटीपुष्करमूलगण्डीरोरुबूकपत्तूराक्षीवाश्मान्तकशिग्रुमातुलुङ्गपीलुकमूलकपर्णीतिलपर्णीपीलुपर्णीमेषशृङ्गीहिंस्रादन्तशठैरावतकभल्लातकास्फोतकाण्डीरात्मजैकेषीकाकरञ्जधान्यकाजमोदपृथ्वीकासुमुखसुरसकुठेरककालमालकपर्णासक्षवककफणिज्झकभूस्तृणशृङ्गवेरपिप्पलीसर्षपाश्वगन्धारास्नारुहारोहावचाबलातिबलागुडूचीशतपुष्पाशीतवल्लीनाकुलीगन्धनाकुलीश्वेताज्योतिष्मतीचित्रकाध्यण्डाम्लचाङ्गेरी- तिलबदरकुलत्थमाषाणामेवंविधानामन्येषांचोष्णवीर्याणां यथालाभमौषधानां कषायं कारयेत्, तेन कषायेण तेषामेव च कल्केनसुरासौवीरकतुषोदकमैरेयमेदकदधिमण्डारनालकट्वरप्रतिविनीतेन तैलपात्रं विपाचयेत्| तेन सुखोष्णेन तैलेनोष्णाभिप्रायिणं ज्वरितमभ्यञ्ज्यात्, तथा शीतज्वरः प्रशाम्यति; एतैरेव चौषधैः श्लक्ष्णपिष्टैः सुखोष्णैः प्रदेहंकारयेत्, एतैरेव च शृतं सुखोष्णं सलिलमवगाहनार्थं परिषेकार्थं च प्रयुञ्जीत शीतज्वरप्रशमार्थम्||२६७|| इत्यगुर्वाद्यं तैलम्| च.चि.3/267

चित्रकमेलां बिम्बीं वृषकं त्रिवृदर्कनागरकम्| चूर्णीकृतमष्टाहं भावयितव्यं पलाशस्य||८५|| च.चि.7/85

कुष्ठार्कतुत्थकट्फलमूलकबीजानि रोहिणी कटुका| कुटजफलोत्पलमुस्तं बृहतीकरवीरकासीसम्||१०२||च.चि.7/102

श्वेतकरवीरपल्लवमूलत्वग्वत्सको विडङ्गश्च| कुष्ठार्कमूलसर्षपशिग्रुत्वग्रोहिणी कटुका||१०६|| एतैस्तैलं सिद्धं कल्कैः पादांशिकैर्गवां मूत्रम्| दत्त्वा तैलचतुर्गुणमभ्यङ्गात् कुष्ठकण्डूघ्नम्||१०७|| इति श्वेतकरवीरपल्लवाद्य तैलम्| च.चि.7/106,107

सप्तच्छदार्कपल्लवमूलत्वङ्निम्बचित्रकास्फोताः| गुञ्जैरण्डं बृहतीमूलकसुरसार्जकफलानि||११२||
च.चि.7/112

पलङ्कषावचापथ्यावृश्चिकाल्यर्कसर्षपैः| जटिलापूतनाकेशीनाकुलीहिङ्गुचोरकैः||३४||च.चि.10/34

जलैश्च वासार्ककरञ्जशिग्रुकाश्मर्यपत्रार्जकजैश्च सिद्धैः| स्विन्नो मृदूष्णै रवितप्ततोयैः स्नातश्च गन्धैरनुलेपनीयः||६७||
च.चि.12/67

रास्नावृषार्कत्रिफलाविडङ्गं शिग्रुत्वचो मूषिकपर्णिका च| निम्बार्जकौ व्याघ्रनखः सदूर्वा सुवर्चला तिक्तकरोहिणी च||७२||
च.चि.12/72

शुद्धानां क्षामदेहानां गव्यं छागं समाहिषम्| देवदारुपलाशार्कहस्तिपिप्पलिशिग्रुकैः||१०८||
च. चि.13/108

अभ्यज्य कुष्ठतैलेन स्वेदयेत् पोट्टलीकृतैः| वृषार्कैरण्डबिल्वानां पत्रोत्क्वाथैश्च सेचयेत्||४४||
मूलकत्रिफलार्काणां वेणूनां वरुणस्य च| अग्निमन्थस्य शिग्रोश्च पत्राण्यश्मन्तकस्य च||४५|| च.चि.14/44-45

नृकेशाः सर्पनिर्मोको वृषदंशस्य चर्म च| अर्कमूलं शमीपत्रमर्शोभ्यो धूपनं हितम्||४९|| च.चि.14/49

शिरीषबीजं कुष्ठं च पिप्पल्यः सैन्धवं गुडः| अर्कक्षीरं सुधाक्षीरं त्रिफला च प्रलेपनम्||५३|| च.चि.14/53

आर्कं पयःसुधाकाण्डं कटुकालाबुपल्लवाः| करञ्जो बस्तमूत्रं च लेपनं श्रेष्ठमर्शसाम्||५७|| च.चि.14/57

चतुष्पलं सुधाकाण्डात्त्रिपलं लवणत्रयात्| वार्ताकीकुडवं चार्कादष्टौ द्वे चित्रकात् पले||१८३|| च.चि.15/183

मुक्ताप्रवालवैदूर्यशङ्खस्फटिकमञ्जनम्| ससारगन्धकाचार्कसूक्ष्मैलालवणद्वयम् ||१२५|| च.चि.17/125

दन्ती चित्रकमूलत्वक् सुधार्कपयसी गुडः| भल्लातकास्थि कासीसं लेपो भिन्द्याच्छिलामपि||१२६|| च.चि.21/126

जात्यर्कपुष्परसरजनीद्वयहिङ्गुपिप्पलीलाक्षाः| जलमुद्गपर्णिचन्दनमधुकमदनसिन्धुवाराश्च||५६|| च.चि.23/56

शङ्खिन्यार्कं पयः शुण्ठी करञ्जो मधु वार्श्चिकं| शिरीषस्य फलं पिष्टं स्नुहीक्षीरेण दार्दुरे||२०९||

च.चि.23/209

शङ्खिन्यार्कं पकपित्थमक्षिपीडोऽर्कबीजं त्रिकटुकं तथा| करञ्जो द्वे हरिद्रे च गृहगोधाविषं जयेत्||२१६||च.चि.23/216

पाठाङ्कोलाश्वगन्धार्कमूलयष्ट्याह्वपद्मकान्| विशालां बृहतीं लाक्षां कोविदारं शतावरीम्||२४४||

च.चि.23/244

न्यग्रोधोदुम्बराश्वत्थकदम्बप्लक्षवेतसाः| करवीरार्ककुटजाः कषाया व्रणरोपणाः||८७||

च.चि.25/87

कदम्बार्जुननिम्बानां पाटल्याः पिप्पलस्य च| व्रणप्रच्छादने विद्वान् पत्राण्यर्कस्य चादिशेत्||९५||

च. चि.25/95

पिण्याकसौवर्चलहिङ्गुभिर्वा ससर्षपत्र्यूषणयावशूकैः| क्रिमिघ्नकम्पिल्लकशङ्खिनीभिः सुधार्कजक्षीरगुडैर्युताभिः||१३||

च.चि.26/13

फलं च मूलं च विरेचनोक्तं हिङ्ग्वर्कमूलं दशमूलमग्र्यम्| स्नुक् चित्रकश्चैव पुनर्नवा च तुल्यानि सर्वैर्लवणानि पञ्च||२४||च. चि.26/24

सुनिषण्णकनिम्बार्कवेत्राग्रवधपल्लवैः| वायसीवास्तुकैरन्यैस्तिक्तैश्च कुलकादिभिः||२७|| च.चि.27/27

मूलैर्वाऽप्यश्वगन्धाया मूलैरर्कस्य वा भिषक्| पिचुमर्दस्य वा मूलैरथवा देवदारुणः||५०|| च.चि.27/50

वत्सकः सुरसं कुष्ठं गन्धास्तुम्बुरुशिग्रुकौ| हिंस्रार्कमूलवल्मीकमृत्तिकाः सकुठेरकाः||५४|| च.चि.27/54

लेपः सर्षपनिम्बार्कहिंस्राक्षीरतिलैर्हितः| श्रेष्ठः सिद्धः कपित्थत्वग्घृतक्षीरैः ससक्तुभिः||१४८|| च.चि.29/148

वाराहे बहुशः पित्ते भावितैर्लक्तकैः कृता| भावितं पयसाऽर्कस्य यवचूर्णं ससैन्धवम्||७१|| च.चि.30/71

उत्ताना चोन्नता शूना सिध्येत् सस्फोटशूलिनी| करीरधवनिम्बार्कवेणुकोशाम्रजाम्बवैः||८२|| च. चि.30/82

कषायैः साधितः स्नेहपिचुः स्याद्विप्लुतापहः| कर्णिन्यां वर्तिका कुष्ठपिप्पल्यर्काग्रसैन्धवैः||१०९|| च.चि.30/109

**TABLE 5 REFERENCES OF ARKA IN KALPA STHANAM**

| YOG | Reference |
|---|---|
| Jeemutaka kalpam | Ch.ka.2/9 |
| Arka dugdhadbhavitavatsaka kashayam | Ch.ka.5/9 |

द्वे चापोथ्याथवा त्रीणि गुडूच्या मधुकस्य वा| कोविदारादिकानां वा निम्बस्य कुटजस्य वा||९||

च.क.2/9

अष्टाहं पयसाऽऽर्केण तेषां चूर्णानि भावयेत्||९|| जीवकस्य कषायेण ततः पाणितलं पिबेत्| च.क.5/9

**REFERENCES OF ARKA IN SUSHRUTA SAMHITA**

**TABLE 6 REFERENCES OF ARKA IN SUTRA STHANAM**

| YOG | Reference |
|---|---|
| Pratisarniya ksharam | su.su.11/12 |
| Rakta pravartmana dravyani | su.su.14/35 |
| Pradooshtasya abhivardhanarthama abhyang | su.su.16/21 |
| Arkadi gana | su.su.38/16-17 |
| Adhobhaghara dravyani | su.su.39/04 |
| Shirovirechnani | su.su.39/06 |
| Vata samshamana varga | su.su.39/07 |

अथानेनैव विधानेन कुटजपलाशाश्वकर्णपारिभद्रकबिभीतकारग्वधतिल्वकार्कस्नुह्यपामार्गपाटलानक्तमालवृषकदलीचित्रकपूतीकेन्द्रवृक्षास्फोताश्वमारकसप्तच्छदाग्निमन्थगुञ्जाश्चतस्रश्च कोशातकीः समूलफलपत्रशाखा दहेत् | सु. सू 11/12

अथ खल्वप्रवर्तमाने रक्ते एलाशीतशिवकुष्ठतगरपाठाभद्रदारुविडङ्गचित्रकत्रिकटुकागारधूमहरिद्रार्काङ्कुरनक्तमालफलैर्यथालाभंत्रिभिश्चतुर्भिः समस्तैर्वा चूर्णीकृतैर्लवणतैलप्रगाढैर्व्रणमुखमवघर्षयेत्, एवं सम्यक् प्रवर्तते ||३५||सु. सू 14/35

अथास्याप्रदुष्टस्याभिवर्धनार्थमभ्यङ्गः | तद्यथा- गोधाप्रतुदविष्किरानूपौदकवसामज्जानौ पयः सर्पिस्तैलं गौरसर्षपजं च यथालाभंसम्भृत्यार्कालर्कबलातिबलानन्तापामार्गाश्वगन्धाविदारिगन्धाक्षीरशुक्लाजलशूकमधुरवर्गपयस्याप्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तंनिदध्यात् ||१९|| सु. सू 16/21

अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणास्तापसवृक्षश्चेति ||१६|| सु. सू 38/16

अर्कादिको गणो ह्येष कफमेदोविषापहः |कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः ||१७|| सु. सू 38/17

त्रिवृताश्यामादन्तीद्रवन्तीसप्तलाशङ्खिनीविषाणिकागवाक्षीच्छगलान्त्रीस्नुक्सुवर्णक्षीरीचित्रककिणिहीकुशकाशतिल्वककम्पिल्लकरम्यकपाटलापूगहरीतक्यामलकबिभीतकनीलिनीचतुरङ्गुलैरण्डपूतीकमहावृक्षसप्तच्छदार्का ज्योतिष्मती चेत्यधोभागहराणि | तत्र तिल्वकपूर्वाणां मूलानि, तिल्वकादीनां पाटलान्तानां त्वचः, कम्पिल्लकफलरजः, पूगादीनामेरण्डान्तानां फलानि,पूतीकारग्वधयोः पत्राणि, शेषाणां क्षीराणीति ||४|| सु. सू 39/04

पिप्पलीविडङ्गापामार्गशिग्रुसिद्धार्थकशिरीषमरिचकरवीरबिम्बीगिरिकर्णिकाकिणिहीवचाज्योतिष्मतीकरञ्जार्कालर्कलशुनातिविषाशृङ्गवेरतालीशतमालसुरसार्जकेङ्गुदीमेषशृङ्गीमातुलुङ्गीमुरङ्गीपीलुजातीशालतालमधूकलाक्षाहिङ्गुलवणमद्यगोशकृद्रसमूत्राणीति शिरोविरेचनानि |तत्र करवीरपूर्वाणां फलानि, करवीरादीनामर्कानां मूलानि, तालीशपूर्वाणां कन्दाः, तालीशादीनामर्जकान्तानां पत्राणि,इङ्गुदीमेषशृङ्ग्योस्त्वचः, मातुलुङ्गीमुरङ्गीपीलुजातीनां पुष्पाणि, शालतालमधूकानां साराः, हिङ्गुलाक्षे निर्यासौ, लवणानिपार्थिवविशेषाः; मद्यान्यासुतसंयोगाः, शकृद्रसमूत्रे मलाविति ||६|| सु. सू 39/06

संशमनान्यत ऊर्ध्वं वक्ष्यामः- तत्रभद्रदारुकुष्ठहरिद्रावरुणमेषशृङ्गीबलातिबलार्तगलकच्छुराशल्लकीकुबेराक्षीवीरतरुसहचराग्निमन्थवत्सादन्येरण्डाश्मभेदकालर्कार्कशतावरीपुनर्नवावसुकवशिरकाञ्चनकभार्गीकार्पासीवृश्चिकालीपत्तूरबदरयवकोलकुलत्थप्रभृतीनिविदारिगन्धादिश्च द्वे चाद्ये पञ्चमूल्यौ समासेन वातसंशमनो वर्गः ||७|| सु. सू 39/07

**TABLE 7 REFERENCES OF ARKA IN CHIKITSA STHANAM**

| YOG | Reference |
|---|---|
| shodhana tailam | su.ci.2/91 |
| Kalyanaka lavanam | su.ci.4/32 |
| Apatanaka parishekam | su.ci.5/18 |
| Arshasamalepan | su.ci.6/12 |
| Bhagandhara vinashaka tailam | su.ci.8/48 |
| Vrana pachna tailam | su.ci.8/50 |
| Kushtha nashaka lepam | su.ci.9/10 |
| shvitra lepam | su.ci.9/27 |
| Kushtha nashaka ghritam | su.ci.9/35 |
| Kushtha nashaka kvatham | su.ci.9/51 |
| Vajraka tailam | su.ci 9/54 |
| Mahavajraka tailam | su.ci 9/58 |
| Yava kalpam | su.ci 10/4 |
| Kushtha nashaka sneham | su.ci 10/1 |
| Shleshma Vidhradi chikitsa | su.ci 16/26 |
| Naḍivrana varti | su.ci 17/35 |
| Nadivrana nashaka tailam | su.ci 17/41 |
| Vataja granthi lepam | su.ci 18/06 |
| Shleshma granthi lepam | su.ci 18/13 |
| Shlaishmik shleepada chikitsa | su.ci 19/58 |
| Unmantha-paaliroga yogam | su.ci 25/18-22 |
| Bhadradi asthapnam | su.ci 38/60 |

नैपाली जालिनी चैव मदयन्ती मृगादनी | सुधामूर्वार्ककीटारिहरितालकरञ्जिकाः ||९१||

सु.चि. 2/91

गण्डीरपलाशकुटजबिल्वार्कस्नुह्यपामार्गपाटलापारिभद्रकनादेयीकृष्णगन्धानीपनिम्बनिर्दहन्यटरूषकनक्तमालकपूतिक बृहतीकण्टकारिकाभल्लातकेङ्गुदीवैजयन्तीकदलीबाष्पद्वयेक्षुरकेन्द्रवारुणीश्वेतमोक्षकाशोका इत्येवं वर्गंसमूलपत्रशाख मार्द्रमाहृत्य लवणेन सह संसृज्य पूर्ववद्दग्ध्वा क्षारकल्पेन परिस्राव्य विपचेत्, प्रतिवापश्चात्र हिङ्ग्वादिभिःपिप्पल्यादिभिर्वा | इत्येतत् कल्याणकलवणं वातरोगगुल्मप्लीहाग्निषङ्गाजीर्णार्शोऽरोचकार्तानां कासादिभिः कृमिभिरुपद्रुतानां चोपदिशन्ति पानभोजनेष्वपीति ||३२|| सु.चि. 4/32

मूलकोरुबूस्फूर्जार्जकार्कसप्तलाशङ्खिनीस्वरससिद्धं तैलमपतानकिनां परिषेकादिषूपयोज्यम् |

अभुक्तवता पीतमम्लं दधि मरिचवचायुक्तमपतानकं हन्ति; तैलसर्पिर्वसाक्षौद्राणि वा | एतच्छुद्धवातापतानकविधानमुक्तं, संसृष्टे संसृष्टं कर्तव्यम् | वेगान्तरेषु चावपीडं दद्यात्; ताम्रचूडकर्कटकृष्णमत्स्यशिशुमारवराहवसाश्चासेवेत, क्षीराणि वा

वातहरसिद्धानि,यवकोलकुलत्थमूलकदधिघृततैलसिद्धा वा यवागूः; स्नेहविरेचनास्थापनानुवासनैश्चैनं दशरात्राहृतवेगमुप क्रमेत;वातव्याधिचिकित्सितं चावेक्षेत; रक्षाकर्म च कुर्यादिति ||१८|| सु.चि. 5/18

अत ऊर्ध्वमर्शसामालेपान् वक्ष्यामः- स्नुहीक्षीरयुक्तं हरिद्राचूर्णमालेपः प्रथमः, कुक्कुटपुरीषगुञ्जाहरिद्रापिप्पलीचूर्णमिति गोमूत्रपित्तपिष्टो द्वितीयः, दन्तीचित्रकसुवर्चिकालाङ्गलीकल्को वा गोपित्तपिष्टस्तृतीयः, पिप्पलीसैन्धवकुष्ठशिरीषफलक ल्कःस्नुहीक्षीरपिष्टोऽर्कक्षीरपिष्टो वा चतुर्थः,कासीसहरितालसैन्धवाश्वमारकविडङ्गपूतीककृतवेधनजम्ब्वर्कोत्तमारणीदन्ती चित्रकालर्कस्नुहीपयःसु तैलं विपक्वमभ्यञ्जनेनार्शःशातयति ||१२||सु.चि. 6/12

त्रिवृद्दन्तीहरिद्रार्कमूलं लोहाश्वमारकौ | विडङ्गसारं त्रिफला स्नुह्यर्कपयसी मधु ||४८|| सु.चि. 8/48

चित्रकार्कौ त्रिवृत्पाठे मलपूं हयमारकम् | सुधां वचां लाङ्गलकीं सप्तपर्णं सुवर्चिकाम् ||५०||

सु.चि. 8/50

अतोऽन्यतमेन घृतेन स्निग्धस्विन्नस्यैकां द्वे तिस्रश्चतस्रः पञ्च वा सिरा विध्येत्; मण्डलानि चोत्सन्नान्यवलिखेदभीक्ष्णं, प्रच्छये द्वा,समुद्रफेनशाकगोजीकाकोदुम्बरिकापत्रैर्वाऽवघृष्यालेपयेल्लाक्षासर्जरसरसाञ्जनप्रपुन्नडावल्गुजतेजोवत्यश्वमारकार्ककु टजारेवतमूलकल्कैर्मूत्रपिष्टैः पित्तपिष्टैर्वा,स्वर्जिकातुत्थकासीसविडङ्गागारधूमचित्रककटुकसुधाहरिद्रासैन्धवकल्कैर्वा, ए तान्येवावाप्य क्षारकल्पेन निःस्रुते पालाशे क्षारे ततोविपाच्य फाणीतमिव सञ्जातमवतार्य लेपयेत्, ज्योतिष्कफललाक्षामरि चपिप्पलीसुमनःपत्रैर्वा,हरितालमनःशिलार्कक्षीरतिलशिग्रुमरिचकल्कैर्वा, स्वर्जिकाकुष्ठतुत्थकुटजचित्रकविडङ्गमरिचरोध्र मनःशिलाकल्कैर्वा,हरीतकीकरञ्जिकाविडङ्गसिद्धार्थकलवणरोचनावल्गुजहरिद्राकल्कैर्वा ||१०|| सु.चि. 9/10

तुत्थालकटुकाव्योषसिंहार्कहयमारकाः | कुष्ठावल्गुजभल्लातक्षीरिणीसर्षपाः स्नुही ||२७||

सु.चि. 9/27

काकमाच्यर्कवरुणदन्तीकुटजचित्रकात् | दार्वीनिदिग्धिकाभ्यां तु पृथग्दशपलं तथा ||३५||

सु.चि. 9/35

निम्बक्वाथं जातसत्त्वः पिबेद्वा क्वाथं वाऽर्कालर्कसप्तच्छदानाम् ||५१ सु.चि. 9/51

सप्तपर्णकरञ्जार्कमालतीकरवीरजम् | स्नुहीशिरीषायोर्मूलं चित्रकास्फोतयोरपि ||५४|| सु.चि. 9/54

कुटजश्च प्रपुन्नाडसप्तपर्णौ मृगादनी | लाक्षा सर्जरसोऽर्कश्च सास्फोतारग्वधौ स्नुही ||५८||

सु.चि. 9/58

क्षुण्णान् यवान्निष्पूतान् रात्रौ गोमूत्रपर्युषितान् महति किलिञ्जे शोषयेत्, एवं सप्तरात्रं भावयेच्छोषयेच्च, ततस्तान् कपालभृ ष्टान् शक्तून्कारयित्वा, प्रातः प्रातरेव कुष्ठिनं प्रमेहिणं वा सालसारादिकषायेणकण्टकिवृक्षकषायेण वापाययेद्भल्लातकप्र पुन्नाडावल्गुजार्कचित्रकविडङ्गमुस्तचूर्णचतुर्भागयुक्तान्; एवमेवसालसारादिकषायपरिपीतानामारग्वधादिकषायपरिपीता नां वा गवाश्वाशकृद्भूतानां वा यवानां शक्तून् कारयित्वा भल्लातकादीनांचूर्णान्यावाप्य खदिराशननिम्बराजवृक्षरोहीतक गुडूचीनामन्यतमस्य कषायेण शर्करामधुमधुरेण द्राक्षायुक्तेनदाडिमामलकवेतसाम्लेन सैन्धवलवणान्वितेन पाययेत्; एष सर्वमन्थकल्पः ||४|| सु.चि. 10/4

कृष्णतिलभल्लातकतैलामलकरससर्पिषां द्रोणं शालसारादिकषायस्य च,त्रिफलात्रिकटुकपरूषफलमज्जविडङ्गफलसार चित्रार्कावल्गुजहरिद्राद्वयत्रिवृद्दन्तीद्रवन्तीन्द्रयवयष्टीमधुकातिविषारसाञ्जनप्रियङ्गूणांपालिका भागास्तानैकध्यं स्नेहपाक विधानेन पचेत्, तत् साधुसिद्धमवतार्य परिस्राव्यानुगुप्तं निदध्यात्, तत उपसंस्कृतशरीरः प्रातःप्रातरुत्थाय पाणिशुक्ति

मात्रं क्षौद्रेण प्रतिसंसृज्योपयुञ्जीत, जीर्णे मुद्गामलकयूषेणालवणेन सर्पिष्मन्तं खदिरोदकसिद्धंमृद्वोदनमश्नीयात् खदिरोद कसेवी, इत्येवं द्रोणमुपयुज्य सर्वकुष्ठैर्विमुक्तः शुद्धतनुः स्मृतिमान् वर्षशतायुररोगो भवति ||१५||

सु.चि 10/15

ततः कुलत्थिकादन्तीत्रिवृच्छ्यामार्कतिल्वकैः | कुर्यात्तैलं सगोमूत्रं हितं तत्र ससैन्धवम् ||२६||

सु.चि. 16/26

स्नुह्यर्कदुग्धेन तु कल्क एषवर्तीकृतो हन्त्यचिरेण नाडीः | बिभीतकाम्रास्थिवटप्रवालाहरेणुकाशङ्खिनिबीजमस्यः ||३५||सु .चि. 17/35

भल्लातकार्कमरिचैर्लवणोत्तमेनसिद्धं विडङ्गरजनीद्वयचित्रकैश्च ||४१|| स्यान्मार्कवस्य च रसेन निहन्ति तैलनाडीं कफानिल कृतामपचीं व्रणांश्च |४२| सु.चि. 17/41

स्वेदोपनाहान् विविधांश्च कुर्यात्तथा प्रसिद्धानपरांश्च लेपान् | विदार्य वा पक्कमपोह्य पूयं प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ||६|| सु. चि. 18/06

स्वेदोपनाहान् विविधांश्च कुर्यात्तथा प्रसिद्धानपरांश्च लेपान् | विदार्य वा पक्कमपोह्य पूयं प्रक्षाल्य बिल्वार्कनरेन्द्रतोयैः ||६||सु. चि. 18/13

हितं वा लेपने नित्यं भद्रदारु सचित्रकम् | विडङ्गमरिचार्केषु नागरे चित्रकेऽथवा ||५८||

सु.चि. 19/58

तालपत्र्यश्वगन्धार्कबाकुचीफलसैन्धवैः |तैलं कुलीरगोधाभ्यां वसया सह पाचितम् ||१८||

पिष्टैर्विडङ्गैरथवा त्रिवृच्छ्यामार्कसंयुतैः | करञ्जेङ्गुदिबीजैर्वा कुटजारग्वधायुतैः ||२२||

सु.चि. 25/18-22

भद्रानिम्बकुलत्थार्ककोशातक्यमृतामरैः | सारिवाबृहतीपाठामूर्वारग्वधवत्सकैः ||६०||

सु.चि. 38/60

**TABLE 8 REFERENCES OF ARKA IN KALPA STHANAM**

| YOG | Reference |
|---|---|
| Sarpavisha yogam | su.ka.5/85 |
| Sarpavisha ksharagada | su.ka.6/3 |
| Sarpavisha mahasughandhi agada | su.ka.6/20 |
| Unmatta shvadi chikitsa | su.ka.7/51-53 |

पुनर्नवा शिरीषस्य पुष्पमारग्वधार्कजम् | श्यामाऽम्बष्ठा विडङ्गानि तथाऽम्राश्मन्तकानि च ||८५||

सु. क. 5/85

धवाश्वकर्णशिरीषतिनिशपलाशपिचुमर्दपाटलिपारिभद्रकाम्रोदुम्बरकरहाटकार्जुनककुभसर्जकपीतनश्लेष्मातकाङ्कोठाम लकप्रग्रहकुटजशमीकपित्थाश्मन्तकार्कचिरबिल्वमहावृक्षारुष्करारलुमधुकमधुशिग्रुशाकगोजीमूर्वाभूर्जतिल्वकेक्षुरकगो पघोण्टारिमेदानां भस्मान्याहृत्य गवां मूत्रेण क्षारकल्पेन परिस्राव्य विपचेत्,दद्याच्चात्र पिप्पलीमूलतण्डुलीयकवराङ्गचोच मञ्जिष्ठाकरञ्जिकाहस्तिपिप्पलीमरिचविडङ्गगृहधूमानन्तासोमसरलाबाह्लीकगुहाकोशाम्रश्वेतसर्षपवरुणलवणप्लक्षनिचुल

कवञ्जुलवक्रालवर्धमानपुत्रश्रेणीसप्तपर्णटुण्टुकैलवालुकनागदन्त्यतिविषाभयाभद्रदारुकुष्ठहरिद्रावचाचूर्णानि लोहानां च समभागानि, ततः क्षारवदागतपाकमवतार्यलोहकुम्भे निदध्यात् ॥३॥सु.क. 6/3

कुमुदोत्पलपद्मानि पुष्पं चापि तथाऽर्कजम् । चम्पकाशोकसुमनस्तिल्वकप्रसवानि च ॥२०॥ सु.क. 6/20

प्रदिह्यादगदैः, सर्पिः पुराणं पाययेत च ।अर्कक्षीरयुतं ह्यस्य दद्याच्चापि विशोधनम् ॥५१॥ सु.क. 7/51

मूलस्य शरपुङ्खायाः कर्षं धत्तूरकार्धिकम् ॥५३॥सु.क. 7/53

**TABLE 9 REFERENCES OF ARKA IN UTTARA TANTRA**

| YOG | Reference |
|---|---|
| Shaleshmabhiṣyanda chikitsa | su.ut.11/5 |
| Arkankur svarasa | su.ut.21/23 |
| Shoṣhinaam deyamansa | su.ut.41/39 |
| Yava saktuka tarpaṇam | su.ut.51/37 |
| Chturnamrochakanam leha | su.ut.57/12 |
| Lashunadivarga sidhma sarpi | su.ut.60/48 |

कुटन्नटास्फोटफणिज्झबिल्वपत्तूरपिल्वर्ककपित्थभङ्गैः ॥५॥स्वेदं विदध्यात्... ।६॥५।सु.उ. 11/5

अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान् ।सन्निदध्यात् स्नुहीकाण्डे कोरिते तच्छदावृते ॥२३॥सु.उ. 21/23

खादेत्, पिबेत् सर्पिरजाविकं वा कृशो यवाग्वा सह भक्तकाले ।सर्पिर्मधुभ्यां त्रिकटु प्रलिह्याच्चव्याविडङ्गोपहितं क्षयार्तः ॥३९॥सु.उ. 41/39

अर्काङ्कुरैर्भावितानां यवानां साध्वनेकशः । तर्पणं वा पिबेदेषां सक्षौद्रं श्वासपीडितः ॥३७॥ सु.उ. 51/37

सात्म्यान् स्वदेशरचितान् विविधांश्च भक्ष्यान् पानानि मूलफलषाडवरागयोगान् ।अद्याद्रसांश्च विविधान् विवधैः प्रकारैर्भुञ्जीत चापि लघुरूक्षमनःसुखानि ॥१२॥सु.उ. 57/12

अर्कमूलं त्रिकटुकं लता स्रोतोजमञ्जनम् ॥४८॥नैपाली हरितालं च रक्षोघ्ना ये च कीर्तिताः ।सिंहव्याघ्रर्क्षमार्जारद्वीपिवाजिगवां तथा ॥४९॥सु.उ. 60/48

**REFERENCES OF ARKA IN ASHTANGA HRIDAYAM**

**TABLE 10 REFERENCES OF ARKA IN SUTRA STHANAM**

| YOG | Reference |
|---|---|
| Shleṣmanashaka gaṇa | aṣ.hr.su.15/7 |
| Arkadi gaṇa | aṣ.hr.su.15/28 |
| Dravasveda dravyani | aṣ.hr.su.17/08 |
| Kshar dravyani | aṣ.hr.su.30/9 |

आरग्वधादिरर्कादिर्मुष्क काद्योऽसनादिकः
सुरसादिः समुस्तादिर्वत्सकादिर्बलासजित् ७ अ.हृ.सू. 15/7

अर्कालर्कौ नागदन्ती विशल्या
भार्ङ्गी रास्ना वृश्चिकाली प्रकीर्या
प्रत्यक पुष्पी पीत तैलोदकीर्या
श्वेतायुग्मं तापसानां च वृक्षः २८

अ.हृ.सू. 15/28

शिरीषवासावंशार्कमालती दीर्घवृन्ततः
पत्रभङ्गैर्वचाद्यैश्च मांसैश्चानूपवारिजैः ८ अ.हृ.सू. 17/8

अश्वकर्णमहावृक्षपलाशास्फोत वृक्षकान्
इन्द्रवृक्षार्कपूतीकनक्त मालाश्वमारकान् ९

अ.हृ.सू. 30/9

**TABLE 11 REFERENCES OF ARKA IN CHIKITSA STHANAM**

| YOG | Reference |
|---|---|
| Vajarak tailam | aṣ.hr.ci.19/77-79 |
| Maha vajarak tailam | aṣ.hr.ci 19/82 |
| Kushṭanashaka tailam | aṣ.hr.ci 19/83 |
| Shvitranashaka lepam | aṣ.hr.ci 20/9 |
| Bhallatakadi tailam | aṣ.hr.ci 20/16-17 |

जीवन्ती मञ्जिष्ठा दार्वी कम्पिल्लकं पयस्तुत्थम्
एष घृततैलपाकः सिद्धः सिद्धे च सर्जरसः ७७

अ. हृ. चि. 19/77

मूलं सप्ताह्वात्त्वक् शिरीषाश्वमारा दर्कान्मालत्याश्चित्रकास्फोत निम्बात्
बीजं कारञ्जं सार्षपं प्रापुनाटंश्रेष्ठा जन्तुघ्नं त्र्यूषणं द्वे हरिद्रे ७९

अ. हृ. चि. 19/79

तुल्यस्नुगर्कदुग्धं सिद्धं तैलं स्मृतं महावज्रम्
अतिशयितवज्रकगुणं श्वित्रार्शोग्रन्थिमालाघ्नम् ८२

अ. हृ. चि. 19/82

कुष्ठाश्वमारभृङ्गार्कमूत्र स्नुकक्षीरसैन्धवैः
तैलं सिद्धं विषावापमभ्यङ्गात् कुष्ठजित्परम् ८३

अ. हृ. चि. 19/83

पूतीकार्कव्याधिघातस्नुहीनां मूत्रे पिष्टाः पल्लवा जातिजाश्च
घ्नन्त्यालेपाच्छ्वित्रदुर्नामदद्रूपामाकोठान् दुष्टनाडीव्रणांश्च ९

अ. हृ. चि. 20/9

भल्लातकं द्वीपिसुधार्कमूलंगुञ्जाफलं त्र्यूषणशङ्खचूर्णम्
तुत्थं सकुष्ठं लवणानि पञ्चक्षारद्वयं लाङ्गलिकां च पक्त्वा १६

अ. हृ. चि. 20/16

स्नुगर्कदुग्धे घनमायसस्थं शलाकया तद्विदधीत लेपम्
कुष्ठे किलासे तिलकालकेषु मषेषु दुर्नामसु चर्मकीले १७

अ. हृ. चि. 20/17

**TABLE 12 REFERENCES OF ARKA IN KALPA STHANAM**

| YOG | Reference |
|---|---|
| Kuṭaja Vamana Kalpa | AṢ.HR.KA.1/46 |

सप्ताहं वाऽकदुग्धाक्तं तच्चूर्णं पाययेत्पृथक
फलजीमूतकेक्ष्वाकुजीवन्तीजीवकोदकैः ४६

अ. हृ. क. 1/46

**TABLE 13 REFERENCES OF ARKA IN UTTARA TANTRA**

| YOG | Reference |
|---|---|
| Vatajkaranshoola Chikitsa Yoga | AṢ.HR.UT 18/2 |
| Unmantha Chikitsa Yoga | AṢ.HR.UT 18/45 |
| Karaṇvardhana Sneha | AṢ.HR.UT 18/57 |
| Krimidanta Chikitsa Yoga | AṢ.HR.UT 22/20 |
| Vataja Galagaṇḍa Chikitsa Yoga | AṢ.HR.UT 22/67 |
| Bhagandhara Nashaka Tailam | AṢ.HR.UT 28/34 |
| Chndanadi Tailam | AṢ.HR.UT 30/23 |
| Nadivṛana Nashaka Varti | AṢ.HR.UT 30/38 |
| Vyanjara Sarpa Dansha Chikitsa | AṢ.HR.UT 36/70 |
| Jaangama Vishanashaka Agada | AṢ.HR.UT 37/43 |
| Kukkuṭa Damsha Agada | AṢ.HR.UT 38/35-36 |
| Kukkuṭa Damsha Agada | AṢ.HR.UT 38/38 |

पत्राणां पृथगश्वत्थबिल्वार्कैरण्डजन्मनाम्
तैलसिन्धूत्थदिग्धानां स्विन्नानां पुटपाकतः २

अ. हृ. उ. 18/2

उन्मन्थेऽभ्यञ्जनं तैलं गोधाकर्कवसान्वितम्
तालपत्र्यश्वगन्धार्कबाकुचीफलसैन्धवैः ४५

अ. हृ. उ. 18/45

मूलं कोशातकाश्वघ्नरूपिकासप्तपर्णजम्
छुच्छुन्दरी कालमृता गृहं मधुकरीकृतम् ५७

अ.हृ. उ. 18/57

गुडेन पूर्णं सुषिरं मधूच्छिष्टेन वा दहेत्
सप्तच्छदार्कक्षीराभ्यां पूरणं कृमिशूलजित् २०

अ. हृ. उ. 22/20

कालामृतार्कमूलैश्च पुष्पैश्च करहाटजैः
एकैषिकान्वितैः पिष्टैः सुरया काञ्जिकेन वा ६७

अ. हृ. उ. 22/67

ज्योतिष्मतीमलयुलाङ्ग लिशेलुपाठा
कुम्भाग्निसर्जार्जिकिरवीरवचासुधार्कैः
अभ्यञ्जनाय विपचेत भगन्दराणां
तैलंवदन्ति परमं हितमेतदेषाम् ३४

अ.हृ. उ. 28/34

गोमूत्रपिष्टैः पलिकैर्विषस्यार्धपलेन च
ब्राह्मीरसार्कजक्षीरगोशकृद्रससंयुतम् २३

अ.हृ. उ. 30/23

घोरटाफलत्वक् लवणं सलाक्षं
बूकस्य पत्रं वनितापयश्च
स्नुगर्कदुग्धान्वित एष कल्को
वर्तीकृतो हन्त्यचिरेण नाडीम् ३८

अ.हृ. उ. 30/38

जीर्णे विरिक्तो भुञ्जीत यवान्नं सूपसंस्कृतम्
करवीरार्ककुसुममूल लाङ्गलिका कणाः ७०

अ.हृ. उ. 36/70

अर्कस्य दुग्धेन शिरीषबीजं
त्रिर्भावितं पिप्पलिचूर्णमिश्रम्
एषोऽगदो हन्ति विषाणि कीट
भुजङ्गलूतोन्दुरवृश्चिकानाम् ४३

अ.हृ. उ. 37/43

दंशं त्वलर्कदष्टस्य दग्धमुष्णेन सर्पिषा
प्रदिह्यादगदैस्तैस्तैः पुराणं च घृतं पिबेत् ३५

अ. हृ. उ. 38/35

अर्कक्षीरयुतं चास्य योज्यमाशु विरेचनम्
अङ्कोल्लोत्तरमूलाम्बु त्रिपलं सहविःपलम् ३६

अ.हृ. उ. 38/36

भिनत्ति विषमालर्कं घनवृन्दमिवानिलः
समन्त्रं सौषधीरत्नं स्नपनं च प्रयोजयेत् ३८

अ.हृ. उ. 38/38

**REFERENCES OF ARKA IN SHARANGHDHAR SAMHITA**

**Table 14 References of ARKA in Madhyama khand (Shen kalpana)**

| YOG | Reference |
|---|---|
| ṣadbindu ghrit | sa.ma.64 |
| Kasisadi tailam | sa.ma.145 |
| Arka tailam | sa.ma.148 |
| Marichyadi tailam | sa.ma.149-150 |
| Vajra tailam | sa.ma.185 |

अर्कक्षीरस्य मतिमांस्तत्सिद्धं गुल्मकुष्ठहृत्
हन्ति शूलमुदावर्त्तं शोथाध्मानं भगन्दरम् ६४

शा.स 64

स्नुह्यर्कपयसी दद्यात्पृथग्द्विपलसंमिते
चतुर्गुणं गवां मूत्रं दत्त्वा सम्यक्प्रसाधयेत् १४५

शा.स 145

अर्कतैलं कुष्ठरोगादौ
अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम्
नाशयेत्सार्षपं तैलं पामां कच्छूं विचर्चिकाम् १४८

शा.स 148

मरिचादितैलं कुष्ठव्रणादौ
मरिचं हरितालं च त्रिवृतं रक्तचन्दनम्
मुस्तं मनःशिला मांसी द्वे निशे देवदारु च १४९

विशाला करवीरं च कुष्ठमर्कपयस्तथा
तथैव गोमयरसं कुर्यात्कर्षमितान्पृथक १५०

शा.स 149/ 150

वज्रतैलं कुष्ठादौ
वज्रीक्षीरं रविक्षीरं द्रवं धत्तूरचित्रजम् १८५ शा.स 185

**Table 15 References of ARKA in Madhyama khand (Dhatu shodhana marana kalpana prakarana bhasma nirmana)**

| YOG | Reference |
|---|---|
| Pittala marana vidhi | sa.ma.25 |
| Tamra pittala kansya marana vidhi | sa.ma.27 |
| Sarva dhatunam marana samanya vidhi | sa.ma.52 |
| Abhraka marana prathama vidhi | sa.ma.61-62 |

धातुशोधनमारणकल्पनाप्रकरणभस्मनिर्माण

आर पित्तल मारणविधिः
अर्कक्षीरेण सम्पिष्टो गन्धकस्तेन लेपयेत्
समेनारस्य पत्राणि शुद्धान्यम्लद्रवैर्मुहुः २५

शा.स 25

ताम्रपित्तल कांस्यमारणविधिः
अर्कक्षीरवदाजं स्यात्क्षीरं निर्गुण्डिका तथा
ताम्ररीतिध्वनिवधे समगन्धकयोगतः २७

शा.स 27

सर्वधातूनां मारणे सामान्यविधिः
शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः
म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा ५२

शा.स 52

अभ्रकमारणे प्रथमो विधिः
कृत्वा धान्याभ्रकं तत्तु शोषयित्थाऽथ मर्दयेत्
अर्कक्षीरैर्दिनं खल्वे चक्राकारं च कारयेत् ६१

वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत्
पुनर्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः ६२

शा.स 61/62

**TABLE 16 REFERENCES OF ARKA IN MADHYAMA KHAND (RAS SHODHANA MARANA KALPANA PRAKARANA)**

| YOG | Reference |
|---|---|
| Parada mukhkarana vidhi | sa.ma.19 |
| Sheetajvarari rasa | sa.ma.51 |
| Sarveshvara rasa | sa.ma.195 |
| Madana kamdeva rasa | sa.ma.262 |

रसशोधनमारणकल्पनाप्रकरण

पारदस्य मुखकरणविधिः

सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव
अर्कसेहुण्डधत्तूरलाङ्गलीकरवीरकम् १९

शा.स 19

गोलं न्यसेत्सम्पुटके पुटं दद्यात् प्रयत्नतः
ततो नीत्वाऽर्कदुग्धेन वज्रीदुग्धेन सप्तधा ५१

शा.स 51

माषैकं मृतवज्रं च तालं शुद्धं पलद्वयम्
जम्बीरोन्मत्तवासाभिः स्नुह्यर्के विषमुष्टिभिः १९५

शा.स 195

स्वाङ्गशीतं च सञ्चूर्ण्य भावयेदर्कदुग्धकैः
अश्वगन्धा च काकोली वानरी मुसली क्षुरा २६२

शा.स 262

**TABLE 17 REFERENCES OF ARKA IN MADHYAMA KHAND (LEPA KALPANA)**

| YOG | Reference |
|---|---|
| Mukha kaarshya lepa | sa.ma.13 |
| Vrana daarana lepa | sa.ma.84 |
| Karana shoolahara rasa | sa.ma.132-137 |

लेपकल्पनाप्रकरण

मुखकार्ष्ण्ये लेपः
अर्कक्षीरहरिद्राभ्यां मर्दयित्वा विलेपनात्
मुखकार्ष्ण्यं शमं याति चिरकालोद्भवं ध्रुवम् १३

शा.स 13

व्रणदारणे लेपाः
तत्र दन्त्यादिलेपः
दन्ती चित्रकमूलत्वक्स्नुह्यर्कपयसी गुडः
भल्लातकास्थिकासीसं सैन्धवं दारणः स्मृतः ८५

शा.स 84

कर्णशूलहरो रसः
पीतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत्
तद्रसः श्रवणे क्षिप्तः कर्णशूलहरः परः १३२

अर्काङ्कुरानम्लपिष्टांस्तैलाक्तांल्लवणान्वितान्
सन्निदध्यात्स्नुहीकाण्डे कोरितेतच्छदावृते १३७

शा.स 132/137

**NIGHANTU KALA: -** Arka is included in different Nighantu in different Vargas. Its properties, morphological characters and uses are also described. References of Arka in different Nighantu are given below.

**TABLE 18 REFERENCES OF ARKA IN NIGHANTU**

| **Nighantu** | **Mentioning of Arka** | **References** |
|---|---|---|
| Ashtanga nighantu | Arkadi gana | 121-123 |
| Dhanvantari nighantu | Karveeradi varga | 13-15 |
| Shodala nighantu | Karveeradi varga namasangraha | 492-494 |
| Shodala nighantu | Karveeradi varga gunasanghraha | 398-399 |
| Madanpala nighantu | Abhyadi varga | 322-323 |
| Kaiyyadeva nighantu | Aushadha varga | 1531-1539 |
| Raja nighantu | Karveeradi varga | 26-30 |
| Bhavprakasha nighantu | Guduchyadi varga | 59-64 |
| Priya nighantu | Karveeradi varga | 65-67 |
| Nighantu aadarsha | Arkadi varga | Page no. 4-17 2nd part |

प्रत्यक्पुष्पी पीततैलोदकीर्या श्वेतायुग्मं तापसानां च वृक्षः ||१२१||

अयमर्कादिको वर्गः कफमेदोविषापहः | कृमिकुष्ठप्रशमनो विशेषाद् व्रणशोधनः ||१२२||

अर्कादौ तु सदापुष्पा सूर्याह्वाऽर्कस्तु रूपिका |मन्दारः श्वेतकुसुमोऽलर्को विकरणः स्मृतः ||१२३||

अर्कः सूर्याह्वयः पुष्पी विक्षीरोऽथ विकीरणः |जम्भलः क्षीरपर्णी स्यादास्फोटो भास्करो रविः ||१३||

अर्कस्तिक्तो भवेदुष्णः शोधनः परमः स्मृतः | कण्डूव्रणहरो हन्ति जन्तुसन्ततिमुद्धताम् ||१४||

अर्कस्तु कटुरूष्णश्च वातहृद्दीपनः सरः | शोफव्रणहरः कण्डूकुष्ठप्लीहकृमीञ्जयेत् ||१५||

अर्कः सूर्याह्वयः पुष्पी विष्किरोऽथ विकीरणः | जम्भलः क्षीरपर्णः स्यादास्फोटश्च तूलफलः ||४९२||

श्वेतार्को दीर्घपत्रश्च श्वेतपुष्पस्तथैव च |४९३|

राजार्को वसुकः प्रोक्तो मन्दारो गणरूपकः ||४९३||

एकाष्ठीलः सदापुष्पः स चालर्कः प्रतापनः |४९४|

गुन्दस्तौवरको दन्तैर्धृतो दन्तरुजापहः |मार्कवः कफपाण्डुघ्नः केश्यः श्वित्राक्षिरोगजित् ||३९८||

अर्कः कृमिहरस्तीक्ष्णः सरोऽर्शकफरोगहृत् |विसूचिकाशिरोवातकुष्ठशोफापहारकः ||३९९||

अर्कःसूर्याहव्यःक्षीरीसदापुष्पोविकीरणः।मन्दारोवसुकोऽलर्कोराजाह्वोदीर्घपत्रकः।।322।।

अर्कदव्यंशंखवातकुष्ठकण्डूविषव्रणान।निहंतिप्लीहगुल्मार्शोयकृच्छलेष्मोदरक्रिमीन।।323।।

सूर्याह्वोऽर्कः सदापुष्पी रूपिका सूर्यपुष्पकः ||१५३१||

आस्फोता जम्भलाः क्षीरी क्षीरपर्णो विकीरणः |क्षतक्षीरी दुग्धनिका पुष्पी कीरतनूफला ||१५३२||

मन्दारो वसुकोऽलर्कोऽध्यर्कोऽध्यक्षः प्रतापलः | एकाष्ठीला श्वेतपुष्पः सदापुष्पो विकीर्णकः ||१५३३||

राजार्कः फलदो दीर्घपुष्पको गणरूपकः |अर्कालर्कौ शरो तिक्तावुष्णौ वातकफौ हतः ||१५३४||

कृमिकुष्ठव्रणार्शोऽस्रप्लीहगुल्मविषग्रहान् |

अर्कस्य पुष्पं मधुरं सतिक्तं कुष्ठं क्रिमिघ्नं कफनाशनञ्च | आखोर्विषं हन्ति च रक्तपित्तं सङ्ग्राहि शोफे च हितं सगुल्मे ||१५३५ ||

अलर्ककुसुमं वृष्यं लघु पाचनदीपनम् | अरोचकप्रसेकार्शःकासश्वासनिबर्हणम् ||१५३६||

अर्कक्षीरं स्नुहीक्षीरं स्निग्धं वा कटुकं लघु | गुल्मिनां कुष्ठिनां चापि तथैवोदररोगिणाम् ||१५३७||

श्रेष्ठमेतद्विरेकार्थे ये चान्ये दीर्घरोगिणः | क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु ||१५३८||

कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनम् |१५३९|

अर्कःक्षीरदलःपुच्छीप्रतापःक्षीरकाण्डकः।विक्षीरोभास्करःक्षीरीखर्जूघ्नःशिवपुष्पकः।।26।।

भञ्जनःक्षीरपर्णीस्यात्सविताचविकीरणः।सूर्य्याह्वश्चसदापुष्पोरविरास्फोटकस्तथा।

तूलफलःशुकफलोविंशतिश्चसमाह्व्यः।।27।।

अर्कस्तुकटुरूष्णश्चवातजिद्दीपनीयकः।शोफव्रणहरःकण्डू-कुष्ठक्रिमीविनाशनः।।28।।

शुक्लार्कस्तपनःश्वेतःप्रतापश्चसितार्ककः।सुपुष्पःशङ्करादिःस्यादत्यर्कोवृत्तमल्लिका।।29।।

श्वेतार्कःकटुतिक्तोष्णोमलशोधनकारकः।मूत्रकृच्छ्रास्रशोफार्त्ति-व्रणदोषविनाशनः।।30।।

अलर्को गणरूपः स्यान्मन्दारो वसुकोऽपि च |श्वेतपुष्पः सदापुष्पः सबालार्कः प्रतीयसः ||५९||

रक्तोऽपरोऽर्कनामा स्यादर्कपर्णो विकीरणः | रक्तपुष्पः शुक्लफलस्तथा स्फोटः प्रकीर्तितः ||६०||

अर्कद्वयं सरं वातकुष्ठकण्डूविषव्रणान् | निहन्ति प्लीहगुल्मार्शःश्लेष्मोदरशकृत्कृमीन् ||६१||

अलर्ककुसुमं वृष्यं लघु दीपनपाचनम् | अरोचकप्रसेकार्शःकासश्वासनिवारणम् ||६२||

रक्तार्कपुष्पं मधुरं सतिक्तं कुष्ठक्रिमिघ्नं कफनाशनं च |अर्शो विषं हन्ति च रक्तपित्तं संग्राहि गुल्मे श्वयथौ हितं तत् ||६३|

क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं लघु | कुष्ठगुम्लोदरहरं श्रेष्ठमेतद्विरेचनम् ||६४||

मन्दारःश्वेतपुष्पःराजार्कोऽलर्कइत्यादि।अर्कस्तवरूणपुष्पःस्याद्ह्रस्वगुल्मोपयोयुतः।।65।।

अर्कपत्रंसरंभेदितीक्ष्णंवातकफापहं।शन्तित्वग्दोषगुल्मार्शःश्वासप्लीहयकृतकृमीन्।।66।।

क्षीरमर्कस्यविज्ञेयंहमनेसाविरेचने।त्वग्दोषश्वित्रनाशिस्यान्नियतंलेपनादपि।।67।।

पीतार्कपत्रमाज्येनलिप्तंवह्नौप्रतापयेत्।तद्रसःश्रवणेक्षिप्तःकर्णशूलहरःपरः।।

अर्कपत्ररसेपक्वंहरिद्राकल्कसंयुक्तम्।नाशयेत्सार्षपंतैलंगनामांकनकच्छूं-विचर्चिकाम्।।

अर्कक्षीरंहरिद्राभ्यांमर्दयित्वाविलेपनात्।मुखकार्ष्ण्यसमंदरयातिचिरकालोद्भवंध्रुवम्।।

## DISCUSSION

Organic irritating poisons are the category in which Calotropis procera falls. In India, it is abundantly accessible.[8] It is clear from reading literature and Ayurveda texts that it has a wide range of therapeutic applications. It will be planted and ploughed before the actual crop is sown and is a beneficial green manure.[9] In parts of India's most dry croplands, it enhances soil nutrients and moisture binding. Calotropis produces a hardy fabric that may be used for fishing nets, carpets, ropes, and sewing thread. Producing leather from a fermented calotropis and saltis combination is used for low-cost bookbinding.[10] It should only be used after a thorough detoxification procedure, as it is an irritating toxin. It is an important herb in both contemporary and Ayurveda medicine.[11] Arka's various properties have been described in various Nighantu, and in accordance with these properties, it is used to treat a variety of illnesses, including leprosy, jeerna jwar fever, pratishyay cold, shotha oedema, udar ascites, pleeha

spleen diseases, blood disorders, micturition difficulty, krumi antimicrobial, lymph nodes, tamak shwas asthma, wounds (loss of appetite).[12] Several modern medications nowadays also use plant extracts as a basis. It is important to understand the global significance of herbal medicine.[13] In India, arka is widely accessible, but relatively few people are aware of its medical benefits; it is still regarded as a toxic plant. This page provides a general overview of the Calotropis procera (Arka) plant, its traditional medical use, and its most recent developments.[14] We can utilise this plant extensively in daily life because it is readily available, and there is room for further study into its potential medical use.[15]

**CONCLUSION: -**

Calotropis procera (Arka) is used therapeutically in this article. Several medical and pharmaceutical organisations steer clear of employing Arka preparation in clinical settings due to its hazardous nature. Using Arka in daily practice following a suitable shodhana (detoxification) procedure will be made easier with the aid of this article for doctors, pharmaceutical businesses, and students. The therapeutic value of Calotropis procera will undoubtedly aid in the development of herbal medicine, and its applications will reduce the negative effects of contemporary medicine and combat drug resistance. Researchers will be inspired and motivated to study on Calotropisprocera (Arkatherapeutic )'s characteristics and to utilize plant resources in the field of medicine after reading this article**.** Consulting all above references it is concluded that Arka is ancient drug which is in use from Vedic period of time. It is also one of the important drugs used from quiet long time as its presence in almost every book of Ayurveda.

**CONFLICT OF INTERST -NIL**

**SOURCE OF SUPPORT -NONE**

**REFERENCES: -**

1. Agnivesha, Charaka Samhita, vol 2 by Acharya V. Shukla and Prof. RD. Tripathi (Chaukhamba Sanskrit Pratishthan, Delhi), Chikitsasthana, kushthachikitsadhyay 7/56,102; 2009. p. 181-205.
2. Agnivesha, Charaka Samhita, vol 2 by Acharya V. Shukla and Prof. RD. Tripathi (Chaukhamba Sanskrit Pratishthan, Delhi), sutrasthana shadvirechniyashatashritiyadhyay 4/9; 2009. p. 72.
3. Charaka Samhita vol.1 by Prof. YG Joshi, vaidyamitra Prakashan Pune. Sutrasthana, shadvirechniyashatashritiya 4/9. p. 70.
4. Susruta samhita of Maharsi Susruta vol.3 by Dr. Anant Ram Sharma Foreword by Acharya Priya Vrat Sharma. Chaukhamba Surbharti Prakashan Varanasi. Uttartantram karngatrog pratishedhadhyay 21/6, 24. p. 156, 158.
5. Susruta samhita of Maharsi Susruta vol.2 by Dr. Anant Ram Sharma Foreword by Acharya Priya Vrat Sharma. Chaukhamba surbharti prakashan Varanasi Chikitsasthana Bhagandarchikitsadhyay 8/48, 50. p. 248. kushthachikitsadhyay 9/35, 54, 58 p. 256, 258. Shwaspratishedhadhyay 51/36. p. 428.
6. Ashtangahrdayam of vagbhata edited with vidyotini Hindi commentary by kaviraj Atrideva Gupta. Edited by vd. Yadunandana Upadhyaya Chaukhamba Prakashan Varanasi, Reprint, chikitsasthana Kushthachikitsitam 19/79, 82, 83; 2015. p. 560, Kitlutadivishpratishedh 37/43. p. 807.

7. Ashtangahrdayam of vagbhata edited with vidyotini Hindi commentary by kaviraj Atrideva Gupta. Edited by vd. Yadunandana Upadhyaya Chaukhamba prakashan Varanasi, Reprint, Uttarsthanam Kitlutadivishpratishedh 37/43; 2015. p. 807. Mukhrogpratishedh 22/67. p. 720.
8. Sharma PC, Yelne MB, Dennis TJ. Database of Medicinal Plants used in Ayurveda, CCRAS New Delhi Reprint vol.2; 2001. p. 69-72.
9. A Conceptual Study of Updhatu In Ayurveda, Dr. Kaustubh Mani Tripathi, Dr. Sunil P Nikhate, Dr. Vaidehi V Raole, Dr. Sujit Kumar, The Pharma Innovation Journal 2019; 8(5): 321-326, ISSN (E): 2277- 7695 ISSN (P): 2349-8242.
10. Astanga Hrudayam of Shrimadvagbhata edited by Dr. Brahmanand Tripathi, Chaukhamba Sanskrit pratishthan, Delhi Uttarsthanam, Mukhrogpratishedhadhyay 22/67.
11. Shri Bhava Misra. Bhavaprakash Nighantu (Hindi commentary), Dr. Chunekarand Dr. GS. Pandey. Guduchyadivarga p. 226-475 9th edition. Chaukhambha bharti Academy Varanasi; 1993. p. 302-306.
12. Ayurvedodharaka Shaligram Vaishya. Shaligrama Nighantu. Guduchyadivarga. Mumbai: Khemraj Shreekrushnadas, Shree Venketeshwar press. p. 222-224.
13. Nighantu Adarsh. Bapalal Vaidya, Arkadivarga p. 3-44 sanskaran dvitiya, Chaukhamba Bharti Academy; 1999. p. 4- 17.
14. Dhanwantari Nighantu. Dr SD Kamat Chaukhamba Sanskrit Prakashan p. 282-283.
15. Raj Nighantu. Dr Indradev Tripathi Ayurvedacharya, Karviradivarga, krushndas Academy Varanasi; 1982. p. 302- 304.